Puspa Shrestha
Best Quality Resource Site for Class 11 And 12 Students
(Based on Updated Curriculum 2077)

Puspa Shrestha
Best Quality Resource Site for Class 11 And 12 Students (Based on Updated Curriculum 2077)
puspas.com.np
PDF
PDF Collections
Notes
Books
Model Questions

This PDF was downloaded from puspas.com.np

Visit our website for more materials.

puspas.com.np

Follow us on:
AR Dinesh
puspas.com.np
Puspa Shrestha

## ३९. नीतिशास्त्रम्

### विशिष्टीकरणतालिका

**कक्षा : १२** **पूर्णाङ्काः ७५**

**समयः घण्टात्रयम्**

| क्र.स. | विषयक्षेत्रम् | प्रश्नप्रकृतिः | ज्ञानम् (१x१= १) | | | बोधः (१x१= १) | | | शिल्पम् (१x५= ५) | | | उच्च-दक्षता (१x८ = ८) | | | प्रष्टव्याः प्रश्नसङ्ख्याः | अङ्कभारः | स्पष्टीकरणम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | क | ख | ग | क | ख | ग | क | ख | ग | क | ख | ग | | | |
| १. | पद्यम् (ज्ञान-प्रधान-विदुरनीतिः) | ज्ञान-बोध-प्रयोगोच्च-दक्षतात्मकम् | १ | - | - | २ | - | - | - | ५ | - | - | - | ८ | ५ | १६ | **ज्ञानबोध**क्षेत्रतः-<br>निर्दिष्टपद्याद् ज्ञानबोधात्मकाः त्रयप्रश्नाः ।<br>**शिल्प**क्षेत्रतः-<br>निर्दिष्टपद्यस्य सरलार्थलेखन-तात्पर्यप्रकाशन-सम्बद्ध एकः प्रश्नः ।<br>अथवा<br>निर्दिष्टपद्यगतविषयस्य विषयमहत्वप्रकाशनसम्बद्ध एकः प्रश्नः ।<br>**उच्चदक्षता**क्षेत्रतः-<br>निर्दिष्टपद्यस्य सप्रसङ्गव्याख्यात्मक एक प्रश्नः ।<br>**अथवा**<br>पठितविषयप्रतिपादकानुच्छेदलेखनसम्बद्ध एकः प्रश्नः । |
| २. | पद्यम् (व्यवहार-प्रधान-विदुरनीतिः) | ज्ञान-बोध-प्रयोगात्मकम् | १ | - | - | २ | - | - | - | १० | - | - | - | - | ५ | १३ | **ज्ञानबोध**क्षेत्रतः-<br>नीतिप्रदानसन्देशप्रदपृथग्वाक्यरचनासम्बद्धाः त्रयप्रश्नाः ।<br>**शिल्प**क्षेत्रतः-<br>पठितपद्यतः भावार्थ-सारांश-अर्थप्रकाशनसम्बद्धः व्याख्यानसम्बद्धः वा एकः प्रश्नः, निर्दिष्टविषयाणां महत्त्वप्रतिपादनसम्बद्ध एकः प्रश्नः अथवा निर्दिष्टविषयाणां लाभहान्योर्विवेचनसम्बद्धः |

CURRICULUM DEVELOPMENT CENTRE

| | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | पार्थक्यप्रदर्शनसम्बद्धः वा एकः प्रश्नः । |
| ३. | पद्यम् (राजनीति-प्रधान-शुक्रनीतिः) | ज्ञान-बोध-प्रयोगोच्च-दक्षतात्मकम् | २ | - | - | २ | - | - | - | १५ | - | - | - | ८ | ८ | २७ | **ज्ञानबोध**क्षेत्रतः-<br>पठितपदानां सन्धिविच्छेद-समासविग्रहप्रदर्शनसम्बद्धेन लिङ्ग-विभक्ति-वचननिदर्शनसम्बद्धौ द्वौ प्रश्नौ,<br>प्रमुखकार्याणां लक्षणवाक्यानाञ्च आधारेण प्रधानशासक-मन्त्रि-प्रशासक-कर्मकर-दूत-सेनापति-कूटनीतिज्ञानां परिचायनसम्बद्धौ द्वौ प्रश्नौ ।<br>**शिल्प**क्षेत्रतः-<br>सान्वयं पठितपद्यव्याख्यानात्मक एकः प्रश्नः, निर्दिष्टविषयाणां महत्त्वप्रतिपादनसम्बद्ध एकः प्रश्नः, अद्यतनसमाजे राज्यव्यवस्थायां वा निर्दिष्टविषयाणां प्रयोगावस्थायाश्चित्रणसम्बद्धः निर्दिष्टविषयाणां लाभस्य हानेर्वा सूत्ररूपेण लेखनसम्बद्ध एकः प्रश्नः ।<br>**उच्चदक्षता**क्षेत्रतः-<br>प्रधानशासक-मन्त्रि-प्रशासक-कर्मचारि-दूत-सेनापति-कूटनीतिज्ञैः सम्पादनीयानां नीतिसम्मतकार्याणामाचरणीयानां गुणानां वा विवेचनसम्बद्ध एकः प्रश्नः ।<br>**अथवा**<br>वेतन-निवृत्तभरण-दण्ड-कोष-कर-न्यायव्यवस्थानामावश्यकताया महत्त्वस्य च नीतिरीत्या प्रतिपादनसम्बद्ध एक प्रश्नः । |
| ४. | पद्यम् (व्यवहार-प्रधान-शुक्रनीतिः) | ज्ञान-प्रयोगोच्च-दक्षतात्मकम् | १ | - | - | - | - | - | - | १० | - | - | - | ८ | ४ | १९ | **ज्ञानबोध**क्षेत्रतः-<br>निर्दिष्टपद्यतः शब्दार्थलेखनसम्बद्धः पर्यायनिदर्शनसम्बद्धर्वा एकः प्रश्नः ।<br>**शिल्प**क्षेत्रतः-<br>निर्दिष्टविषयेषु समाजे प्रचलितानां मूल्यमान्यताचरणव्यवहाराणां नीत्यनुकूलतापरीक्षणसम्बद्धः संशोधनीयपक्षाणां |

CURRICULUM DEVELOPMENT CENTRE

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | | सूत्रीकरणसम्बद्धर्वा एकः प्रश्नः, पठितपद्यतः चतुर्षु वाक्येषु व्यवहारनीतीनां सूचीकरणसम्बद्धः एकः प्रश्नः अथवा निर्दिष्टविषयप्रतिपादनसम्बद्धः एकः प्रश्नः<br>**उच्चदक्षता**क्षेत्रतः-<br>निर्दिष्टपद्यस्य सप्रसङ्गव्याख्यात्मक एकः प्रश्नः ।<br>**अथवा**<br>पठितविषयप्रतिपादकानुच्छेदलेखनसम्बद्ध एकः प्रश्नः । |
| योगः | | | ५ | | | ६ | | | | ४० | | | | २४ | २२ | ७५ | |

**द्रष्टव्यः** ‘क’ इत्यनेन अतिलघुप्रश्नो बोध्यः ।
‘ख’ इत्यनेन लघुप्रश्नो बोध्यः ।
‘ग’ इत्यनेन सामान्यतया विस्तृतोत्तरापेक्षी (व्याख्यात्मकः) प्रश्नो बोध्यः।

**पुनश्च** - ज्ञानबोधक्षेत्रात् विकल्परहिताः प्रश्नाः प्रष्टव्याः । शिल्पक्षेत्रात् यथेच्छप्रकरणतः प्रश्नद्वयं संयोज्य आहत्य दश प्रश्नाः प्रष्टव्याश्चेत् उच्चदक्षताक्षेत्रात् यथेच्छप्रकरणत एकं प्रश्नं संयोज्य आहत्य चत्वारः प्रश्नाः प्रष्टव्याः । आहत्य तेषु दशसु छात्रैरष्टौ प्रश्नाः समाधेयाश्चेच्चतुर्षु त्रयः प्रश्नाः समाधेयाः ।

CURRICULUM DEVELOPMENT CENTRE

# निदर्शनप्रश्नपत्रम्

| | | |
|---|---|---|
| कक्षा - १२ | नीतिशास्त्रम् | पूर्णाङ्काः - ७५ |
| समयः - | | उत्तीर्णाङ्काः - ३० |

खण्डः क

१. अधस्तनप्रश्नानां अतिसङ्क्षेपेण उत्तराणि लिखत - ११×१=११

क) के सुवर्णपुष्पां पृथिवीं चिन्वन्ति ?

ख) गुणवतां किं बलम् ?

ग) 'अजातशत्रुः' इति शब्दस्य विग्रहवाक्यं दर्शयत ।

घ) 'अबहुवाषिता' इति पदस्य प्रयोद्वारा नीतिसन्देशदायकं पद्यमेकं रचयत ।

ङ) 'प्रभाषेत' इति पदस्य प्रयोगद्वारा कीदृशं वक्तव्यमित्युपदेशकं वाक्यमेकं रचयत ।

च) कः पुरुषः दुर्बुद्धिरुच्यते ? एकेन वाक्येन उत्तरो देयः ।

छ) 'व्यसनाद्' इति पदस्य लिङ्गविभक्तिवचनानि निर्दिश्यन्ताम् ।

ज) 'चैतान्यतिलालयेत्' इत्यस्य सन्धिविच्छेदो विधीयताम् ।

झ) सभासदां द्व लक्षणे उपस्थाप्येताम् ।

ञ) नीतिशास्त्रास्त्रव्यूहादिनीतिविद्याविशारदत्वं कस्य लक्षणम् ?

ट) 'याथातथ्येन' इति पदस्य पर्यायं लिखत ।

खण्डः ख

२. अधस्तनयोरेकस्य पद्यस्य सरलार्थं लिखत- ५

क) द्वावम्भसि निवेष्टव्यौ गले बध्वा दृढां शिलाम् ।
धनवन्तमदातारं दरिद्रं चातपस्विनम् ॥

ख) धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा ।
मित्राणां चानभिद्रोहः सप्तैता समिधः श्रियः ॥

३. द्वयोः पद्ययोः भावार्थं प्रकाशयत- २×५=१०

क) एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।
विद्यैका परमा तृप्तिरहिंसैका सुखावहा ॥

ख) अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च ।

CURRICULUM DEVELOPMENT CENTRE

पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥

ग) विद्या शौर्यं च दाक्ष्यं च बलं धैर्यञ्च पञ्चमम् ।
मित्राणि सहजान्याहुर्वर्तयन्ति हि तैर्बुधाः ॥

४. अधस्तनयोरेकस्य श्लोकस्य सान्वयं व्याख्यानं कुरुत - ५

क) इङ्गिताकारचेष्टज्ञः स्मृतिमान् देशकालवित् ।
षाड्गुण्यमन्त्रविद्वाग्मी वीतभीर्दूत इष्यते ॥

ख) शत्रोरपि गुणा ग्राह्या गुरोस्त्याज्यास्तु दुर्गुणाः ।
उत्कर्षो नैव नित्यं स्यान्नापकर्षस्तथैव च ॥

५. अधस्तनेषु द्वयोरुत्तरं लिखत- २×५=१०

क) पठितपाठानुसारं पर्यावरणरक्षणस्य महत्त्वं प्रतिपादयत ।

ख) चतुर्भिर्वाक्यैः सन्मित्रस्य लक्षणमुपस्थापयत ।

ग) राज्यसञ्चालने निर्णयक्षमतायाः किमर्थम् आवश्यकता ? प्रतिपादयत ।

६. अस्माकं राष्ट्रे प्रशासकेषु समुचितानि लक्षणानि विद्यन्ते न वा ? पठितपाठानुसारं लिखत । ५

७. अधुना समाजे विद्याधनयोरुपार्जने का त्रुटिर्दृश्यते ? पाठानुसारं विवेचयत । ५

खण्डः ग

८. अधस्तनं श्लोकं सन्दर्भ-कोष-पर्यायाद्युल्लेखनपुरःसरं व्याख्याय भावार्थमपि प्रकाशयत । ८

क्षिप्रं विजानाति चिरं शृणोति विज्ञाय चार्थं भजते न कामात् ।
नासम्पृष्टो व्यौपयुङ्क्ते परार्थे तत्प्रज्ञानं प्रथमं पण्डितस्य ॥

अथवा

विदुरनीतेः भावमनुसृत्य प्रज्ञागौरवस्य विषये लघुनिबन्धमेकं रचयत ।

९. राज्यस्य सुसञ्चालनाय प्रधानशासक-मन्त्रि-प्रशासकैः कार्याणि कथं सम्पादनीयानि ?
नीतिशास्त्रमनुसृत्य विवेचयत । ८

अथवा

वेतन-निवृत्तिभरणयोः करस्य महत्त्वञ्च नीतिरित्या प्रतिपादयत ।

१०. अधस्तनपद्यस्य सन्दर्भ-कोष-विग्रहादिप्रदर्शनपुरःसरं व्याख्यानं विधाय व्यावहारिकतां प्रतिपादयत– ८

अतिदानतपःसत्ययोगो दारिद्र्यकृत्त्विह ।

धर्मार्थौ यत्र न स्यातां तद्वाक् कामं निरर्थकम् ॥

अथवा

धूर्तसज्जनयोः स्वरूपस्य विषये ग्रन्थतो भावमाधृत्य लघुनिबन्धमेकं रचयत ।

समाप्तम्

CURRICULUM DEVELOPMENT CENTRE

# Puspa Shrestha

Best Quality Resource Site for Class 11 And 12 Students
(Based on Updated Curriculum 2077)

Please subscribe to our YouTube Channel. Also, like and follow us on our Facebook Page.

Please check out the following post for downloading model questions of other subjects.

## Class 12 Model Question 2078 PDF (All Subjects) With Specification Grid



Dinesh Shrestha




Please email us at pdf-feedback@puspas.com.np if you have any suggestions or feedback.

**Follow us on:**

AR Dinesh

puspas.com.np

Puspa Shrestha